कक्षा 10 वीं अर्द्ध वार्षिक परीक्षा, 2023-24

संस्कृत -512 {set-A}

( समय : 03 घण्टे ) ( पूर्णांक :75 )

निर्देशा:- 1. सर्वे प्रश्ना: अनिवार्या: सन्ति ।
2. प्रश्नानां सम्मुखे अंका: प्रदत्ता: ।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि ।

प्र. 1.उचितं विकल्पं चित्वा लिखत— ( 1×6=6 )

(i) फलशब्दस्य प्रथमा विभक्ते: बहुवचनम् रुपम् अस्ति–
(अ) फलानि (ब) फलम् (स) फले (द) फलात्

(ii) बालकशब्दस्य पञ्चमी विभक्ते: रुपम् अस्ति–
(अ) बालकेन (ब) बालके (स) बालक: (द) बालकात्

(iii) बालिकाशब्दस्य चतुर्थी विभक्ते: रुपम् अस्ति–
(अ) बालिकायै (ब) बालिकया (स) बालिकाम् (द) बालिकाया:

(iv) रामशब्दस्य सप्तमी विभक्ते: एकवचनं अस्ति–
(अ) राम: (ब) रामे (स) रामै: (द) रामात्

(v) अधोलिखितेषु अव्ययम् अस्ति–
(अ) राम: (ब) मोहन: (स) सर्वत्र (द) बालक:

(vi) अधोलिखितेषु अव्ययम् न अस्ति–
(अ) एव (ब) अद्य (स) अत्र (द) छात्र:

प्र. 2. कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत– (1×6=6)

(i) द्विगु-समासस्य उदाहरणं............ अस्ति। ( रोगमुक्त:/ त्रिभुवनम् )
(ii) द्वन्द्व-समासस्य उदाहरणं............ अस्ति। ( जलमग्न:/ हरिहरौ )
(iii) तत्पुरुष-समासस्य उदाहरणं............ अस्ति। ( राजपुरुष:/ असत्यम् )
(iv)' सूर्योदय:' पदे.................... सन्धि:अस्ति। ( दीर्घसन्धि:/ गुणसन्धि: )
(v)' अद्यैव' पदे.................... सन्धि:अस्ति। ( यणसन्धि:/ वृद्धिसन्धि: )
(vi)' यदि + अपि सन्धियुक्तपदं .................... भवति। ( यद्यपि / यदपि )

प्र. 3. उचितं युग्ममेलनं कुरुत — (1×6=6)

| | |
|---|---|
| (क) भवति | (i) अनु |
| (ख) गम् धातो: | (ii) लट्लकार: |
| (ग) पठसि | (iii) भूधातो: |
| (घ) भविष्यकाले | (iv) प्र |
| (ङ) अनुगच्छति | (v) मध्यमपुरुष: |
| (च) प्राचार्य: | (vi) गच्छति |

प्र. 4. एकपदेन उत्तरम् लिखत — (1×6=6)

(i) वृषभ: कुत्र पपात?
(ii) केन सम्बन्धेन वाल्मीकि: लवकुशयो: गुरु:?
(iii) अत्र जीवितं कीदृशं जातम्?
(iv) 'क्रीडितम्' इत्यस्मिन् पदे प्रत्यय: अस्ति?
(v) 'पठित्वा' इत्यस्मिन् पदे प्रत्यय: अस्ति?
(vi) 'टाप् ' इत्यस्मिन् प्रत्ययस्य उदाहरणम् अस्ति?

https://www.mpboardonline.com

प्र. **5.** शुद्ध वाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्षं न इति लिखत– (1×6=6)

(i) 'आम्रम्' पदस्य पर्यायपदं रसालम् अस्ति।

(ii) 'शरीरम्' पदस्य पर्यायपदं तनुः नास्ति।

(iii) 'मूर्खः' पदस्य विलोमपदं पंडितः नास्ति।

(iv) 'सम्पत्तौ' पदस्य विलोमपदं विपत्तौ अस्ति।

(v) 'अतिदीर्घः प्रवासः'इत्यत्र प्रवासः विशेष्यपदम् अस्ति।

(vi) 'सुंदरी बालिका 'इत्यत्र बालिका विशेषणपदम् नास्ति।

प्र. **6.** माता सुरभिः किमर्थम् अश्रुणि मुञ्चति स्म ? (2)

अथवा

कविः किमर्थ प्रकृतेः शरणम् इच्छति?

प्र. **7.** वस्तुतः चौरः कः आसीत् ? (2)

अथवा

केन समः बन्धुः नास्ति ?

प्र. **8.** अन्ते सर्वे मिलित्वा कस्य राज्याभिषेकाय तत्पराः भवन्ति? (2)

अथवा

रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत् ?

प्र. **9.** नराणां प्रथमः शत्रुः कः? (2)

अथवा

माता सुरभिः किमर्थम् अश्रुणि मुञ्चति स्म ?

प्र. **10.** निर्धनः जनः कथं वित्तम् उपार्जितवान् ? (2)

अथवा

बालभावात् हिमकरः कुत्र विराजते ?

प्र. **11.** रेखांकितपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत – ( कोऽपि द्वौ ) (2)

(i) गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति।

(ii) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

(iii) त्वं मानुषात बिभेषि।

प्र. **12.** अधोलिखितानि वाक्यानि कः कं प्रति कथयति – ( कोऽपि द्वौ ) (2)

(i) विरम विरम आत्मश्लाघायाः।

(ii) जानामि अहं तस्य नामधेयम्।

(iii) तस्या [illegible]।

प्र. **13.** वाच्य-परिवर्तनम् कुरुत — ( कोऽपि द्वौ ) (2)

(i) रामः गृहं गच्छति। (कर्मवाच्य)

(ii) [illegible] हस्यते। (कर्तृवाच्य)

(iii) सः रोटिकां खादति । (कर्मवाच्य)

प्र.14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकम् शुभाषितम् लिखत – (2)

प्र. **15.** अधोलिखितेषु अशुद्धवाक्येषु शुद्धिम् कुरुत— ( कोऽपि द्वौ ) (2)

(i) त्वम् [illegible] गच्छति।

(ii) श्री गणेश नमः।

(iii) बालकः पुस्तकं पठन्ति।

प्र. 16. प्रदत्तैः शब्दैःरिक्तस्थानानिपूर्तिं कुरुत — ( कोऽपि चत्वारः ) ( 1/2×4=2)

( सदा, मेध्यामध्यभक्षकः, चित्ते, स्थितप्रज्ञः, आत्मश्लाघाहीनः, अहिभुक )

(i) बकः अविचलः ..........इव तिष्ठति।

(ii) मयूरः.......... इति नाम्नाऽपि ज्ञायते।

(iii) उलूकः...........पदनिर्लिप्तः चासीत्।

(iv) काकः .......... भवति।

(V)............... समयस्य सदुपयोगः करणीयः।

(Vi) अवक्रता यथा..........

प्र. 17. प्रदत्तवाक्यैः घटनाक्रमानुसारं लिखत— ( 1/2×4=2)

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ii) प्रत्युत्पन्नमतिः सा शृगालं आक्षिपन्ती उवाच।

(iii) जम्बुककृतोत्साह; व्याघ्रः पुनः काननम् आगच्छत् ।

(iv) मार्गे सा एक व्याघ्रम् अपश्यत्।

प्र. 18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्-मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

(क) केन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ?

(ख) का प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्?

(ग) त्वं किं लप्स्यसे?

अथवा

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रम् ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय

(क) देउलाख्यो ग्रामे कः वसति स्म?

(ख) तस्य भार्या का आसीत् ?

(ग) सा कं ददर्श ?

प्र. 19. अधोलिखितं पद्यांश पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

(क) कः बाल्ये पुत्राय महत् विद्याधनं यच्छति ?

(ख) पिता कस्मै बाल्ये महत् विद्याधनं यच्छति ?

(ग) का उक्तिस्तत्कृतज्ञता ?

अथवा

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलंन मूषकः।।

(क) कः गुणं वेत्ति?

(ख) बलं कः न वेत्ति?

(ग) सिंहस्य बलं कः वेत्ति कः न वेत्ति?

https://www.mpboardonline.com

प्र. **20.** अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत- (3)

रामः-कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषकः-किं द्वयोरप्येकमेव प्रतिवचनम् ?

लव-भ्रातरावावां सोदर्यौ ।

रामः-समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः-आवां यमलौ।

रामः-सम्प्रति युज्यते। किं नामधेयम् ? वन्दनायाम्..........

(क) को आवां सोदर्यौ ?

(ख) कथं शरीरसन्निवेशः?

(ग) लवः-आवां कौ?

अथवा

वनस्य दृश्यं समीपे एवैका नदी वहति। एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एवं तिष्ठति।

(क) कः सुखेन विश्राम्यते ?

(ख) कः आगत्य सिंहस्य पुच्छं धुनाति ?

(ग) अपरः वानरः किं करोति ?

प्र. **21.** अधोलिखितं अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत- (4)

संस्कृतभाषा अस्माकं देशस् प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषया एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् किन्तु संस्कृतस्य महत्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। अस्मात् एव संस्कृत-भाषायाः ज्ञानं आवश्यकम् अस्ति। "जयतु संस्कृतं, जयतु भारतम्"। https://www.mpboardonline.com

(क) उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत।

(ख) अस्माकं देशस्य प्राचीनतमा भाषा का ?

(ग) सर्वे वेदग्रन्थाः कस्याम् भाषायां सन्ति ?

(घ) भारतराष्ट्रस्य एकतायाः आधारः कः ?

प्र. **22.** स्व प्रचार्यस्य कृते अवकाशार्थम् प्रार्थना पत्रं लिखत— (4)

अथवा

अग्रजस्य विवाहे आमंत्रयितुं स्व-मित्रं प्रति पत्रं लिखत —

प्र. 23 अधोलिखितेषु एकं विषयं स्वीकृत्य विंशत्यधिक-शतशब्देषु (120) संस्कृत भाषाया निबंध लिखत — (4)

(क) संस्कृतभाषायाः महत्वम्

(ख) अस्माकं भारत-देशः

(ग) पर्यावरणम्

(घ ) महाकविः कालिदासः

https://www.mpboardonline.com